শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯৪

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯৪

*তত্বজ্ঞানোতপত্তিপ্রকারৰর্ণনং বন্ধমোক্ষস্বরূপৰর্ণনং*
*ভক্তিপ্রার্থনাৰর্ণনং চ*

শুদ্ধা নিষ্কামধর্মৈঃ প্রৰরগুরুগিরা ততস্বরূপং পরং তে
শুদ্ধং দেহেন্দ্রিযাদিৰ্যপগতমখিলৰ্যাপ্তমাৰেদযন্তে।
নানাত্বস্থৌল্যকার্শ্যাদি তু গুণজৰপুস্সঙ্গতোধ্যাসিতং তে
ৰহ্নের্দারুপ্রভেদেষ্বিৰ মহদণুতাদীপ্ততাশান্ততাদি॥ ১॥

আচার্যাখ্যাধরস্থারণিসমনুমিলচ্ছিষ্যরূপোত্তরার-
ণ্যাৰেধোদ্ভাসিতেন স্ফুটতরপরিবোধাগ্নিনা দহ্যমানে।
কর্মালীৰাসনাততকৃততনুভুৰনভ্রান্তিকান্তারপূরে
দাহ্যাভাৰেন ৰিদ্যাশিখিনি চ ৰিরতে ত্বন্মযী খলৰৰস্থা॥ ২॥

এৰং ত্বতপ্রাপ্তিতোন্যো নহি খলু নিখিলক্লেশহানেরুপাযো
নৈকান্তাত্যন্তিকাস্তে কৃষিৰদগদষাডগুণ্যষডকর্মযোগাঃ।
দুর্বৈকল্যৈরকল্যা অপি নিগমপথাস্ততফলান্যপ্যৰাপ্তা
মত্তাস্তৰাং ৰিস্মরন্তঃ প্রসজতি পতনে যান্ত্যনন্তান্ ৰিষাদান্॥ ৩॥

ত্বল্লোকাদন্যলোকঃ ক্বনু ভযরহিতো যত্ পরার্ধদ্বযান্তে
ত্বদ্ভীতসসত্যলোকেপি ন সুখৰসতিঃ পদ্মভূঃ পদ্মনাভ।
এৰং ভাৰে ত্বধর্মার্জিতবহুতমসাং কা কথা নারকাণাং
তন্মে ত্বং ছিন্ধি বন্ধং ৰরদ কৃপণবন্ধো কৃপাপূরসিন্ধো॥ ৪॥

যাথার্থ্যাত্ত্বন্মযস্যৈৰ হি মম ন ৰিভো ৰস্তুতো বন্ধমোক্ষৌ
মাযাৰিদ্যাতনুভ্যাং তৰ তু ৰিরচিতৌ স্বপ্নবোধোপমৌ তৌ।
বদ্ধে জীৰদ্বিমুক্তিং গতৰতি চ ভিদা তাৰতী তাৰদেকো
ভুঙ্‌ক্তে দেহদ্রুমস্থো ৰিষযফলরসান্নাপরো নির্ব্যথাত্মা॥ ৫॥

www.prapatti.com

জীৱন্মুক্তত্বমেৱংৱিধমিতি ৱচসা কিং ফলং দূরদূরে
তন্নামাশুদ্ধবুদ্ধের্ন চ লঘু মনসশশোধনং ভক্তিতোন্যত্।
তন্মে ৱিষ্ণো কৃষীষ্ঠাস্ত্বযি কৃতসকলপ্রার্পণং ভক্তিভারং
যেন স্যাং মঙক্ষু কিঞ্চিদগুরুৱচনমিলত্ত্বতপ্রবোধস্ত্বদাত্মা॥ ৬ ॥

শব্দব্রহ্মণ্যপীহ প্রযতিতমনসস্ত্বাং ন জানন্তি কেচিত
কষ্টং ৱন্ধ্যশ্রমাস্তে চিরতরমিহ গাং বিভ্রতে নিষ্প্রসূতিম্।
যস্যাং ৱিশ্বাভিরামাসসকলমলহরা দিৱ্যলীলাৱতারাঃ
সচ্চিতসান্দ্রং চ রূপং তৱ ন নিগদিতং তাং ন ৱাচং ভ্রিযাসম্॥ ৭ ॥

যো যাৱান্ যাদৃশো ৱা ত্বমিতি কিমপি নৈৱাৱগচ্ছামি ভূম-
ন্নেৱঞ্চানন্যভাৱস্ত্বদনুভজনমেৱাদ্রিযে চৈদ্যৱৈরিন্।
ত্বল্লিঙ্গানাং ত্বদঙঘ্রিপ্রিযজনসদসাং দর্শনস্পর্শনাদি-
র্ভূযান্মে ত্বতপ্রপূজানতিনুতিগুণকর্মানুকীর্ত্যাদরোপি॥ ৮ ॥

যদ্যল্লভ্যেত তত্তত্তৱ সমুপহৃতং দেৱ দাসোস্মি তেহং
ত্বদ্গেহোন্মার্জনাদ্যং ভৱতু মম মুহুঃ কর্ম নির্মাযমেৱ।
সূর্যাগ্নিব্রাহ্মণাত্মাদিষু লসিতচতুর্বাহুমারাধযে ত্বাং
ত্বতপ্রেমার্দ্রত্বরূপো মম সততমভিষ্যন্দতাং ভক্তিযোগঃ॥ ৯ ॥

ঐক্যং তে দানহোমব্রতনিযমতপসসাঙখ্যযোগৈর্দুরাপং
ত্বতসঙ্গেনৈৱ গোপ্যঃ কিল সুকৃতিতমাঃ প্রাপুরানন্দসান্দ্রম্।
ভক্তেষৱন্যেষু ভূযসস্বপি বহুমনুষে ভক্তিমেৱ ত্বমাসাং
তন্মে ত্বদ্ভক্তিমেৱ দ্রঢয হর গদান্ কৃষ্ণ ৱাতালযেশ॥ ১০ ॥

**********

www.prapatti.com